स्त्रियां तु संहतिर्वृंदं निकुरंबं कदंबकम् १९ वृंदभेदाः समैर्वर्गः १ संघसार्थौ तु जंतुभिः २
सजातीयैः कुलं १ यूथं तिरश्चां पुंनपुंसकम् १ पशूनां समजः १ अन्येषां समाजः १ अथ सध १९
र्मिणां स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियाम् ४ कापोतशौकमायूरतैत्तिरादीनि त २

28

इणे ४ गद्दाससक्ताः पदिरगाह्वे कालेरद्रकायते इत्यमरकोशे द्वितीयकांडे सिंहादि

वर्गः पंचमः ५ ॐ मनुष्या मनुजा मर्त्या मानुषा मानवा नराः ६ स्युः पुमांसः पंचजनाः पुरु

षाः पूरुषा नरः ५ स्त्री योषिदबला नारी योषा सीमंतिनी वधूः प्रतीपदर्शिनी वामा वनि

ता महिला तथा ॥ विशेषास्त्वंगना भीरुः कामिनी वामलोचना प्रमदा मानिनी कां

ता ललना च नितंबिनी सुंदरी रमणी रामा ॥१ कोपना सैव भामिनी १ वरारोहा मत्तका

शिन्युत्तमा वरवर्णिनी ४ कृताभिषेका महिषी १ भोगिन्योऽन्या नृपस्त्रियः । पत्नी पाणि

गृहीती च १ द्वितीया सहधर्मिणी भार्या जाया च पुंभूम्नि दाराः सहचरी च स्यात्तु कुटुं

बिनी पुरंध्री १ सुचरित्रा तु सती साध्वी पतिव्रता ४ कृतसापत्निकाध्यूढाधिविन्ना १ स्व

यंवरा पतिंवरा वर्या च १ कुलस्त्री कुलपालिका १ कन्या कुमारी १ गौरी तु न

ग्निकानागतार्तवा १ स्यान्मध्यमा दृष्टरजाः १ तरुणी युवतिः समे १ समाः स्नुषा जनी

अ को ४८ ३ 30 २

वधः २ वधूटीव चिरंटीतुसुवासिनी २ इच्छावतीकामुकास्यात् २ वृषस्यंतीतुकामुकी

२ कांतार्थिनीतुयायातिसंकेतंसाभिसारिका । पुंश्चलीधर्षणीबंधकासतीकुलटेत्वरी

स्वैरिणीपांसुलाचस्यात् ८ अशिश्वीशिशुनाविना । अवीरानिष्पतिसुता । विश्वस्ता

विधवेसमे २ आलिःसखीवयस्याथ २ सध्रीच पतिवत्नीसभर्तृका २ वृद्धापलिक्नी २

प्राज्ञीतुप्रज्ञा २ प्राज्ञातुधीमती २ शूद्रीशूद्रस्यभार्यास्यात् । शूद्रातज्जातिरेगना । आ

भीरीतुमहाशूद्रीजातिपुंयोगयोःसमाः २ अर्याणीस्वयमर्यास्यात् २ क्षत्रियाक्षत्रिया

ण्यपि २ उपाध्यायाप्युपाध्यायी २ स्यादाचार्यापिचस्वतः । आचार्यानीतुपुंयोगे । स्या

दर्यीक्षत्रियीतथा २ उपाध्यान्युपाध्यायीपोटास्त्रीपुंसलक्षणावीरपत्नीवीरभार्या

२ वीरमातुवीरसूः २ जीवत्सुजीवतोकाकुनेटाचकूटवादिनी जातापत्याप्रजाताचप्र ४८

सूताचप्रसूतिका ४ स्त्रीनग्निकाकोटवीस्यात् २ दूतीसंचारिकेसमे २ कात्यायन्यर्ध २

वृद्धायाकंषायवसनाधवा । सैरंध्रीपरवेश्मस्था । स्ववशाशिल्पकारिका । असिक्नीस्या।
दवृद्धायाप्रेष्यांतःपुरचारिणी २ वारस्त्रीगणिकावेश्यारूपाजीवापण्यस्त्रीपण्यस्त्रीव अ।
थरजस्वला स्त्रीधर्मिण्यावीरात्रेयीमलिनीपुष्पवत्यपि ऋतुमत्यप्युदक्यापि ८ पुष्पिताव
स्याद्रजःपुष्पमार्तवम् ३ श्रद्धालुर्दोहदवती २ निष्कलाविगतार्तवा २ आपन्नसत्वा
स्याद्गुर्विण्यंतर्वत्नीचगर्भिणी ४ गणिकादेस्तुगाणिक्यंगार्भिणंयौवतंगणे २ पुनर्भू।
र्दिधिषूरूढाद्विस्तस्यादिधिषुःपतिः । सतुद्विजोग्रेदिधिषूसैवयस्यकुटुंबिनी । का
नीनःकन्यकाजातःसुतः । अथसुभगासुताःसौभागिनेयःस्यात् २ पारस्त्रैणेयस्तुपर
स्त्रियाः । पैतृष्वसेयःस्यात्पैतृष्वस्रीयश्चपितृष्वसुः सुतः २ मातृष्वसुश्चैवं २ वैमात्रेयोवि
मातृजः २ साम्मातुरस्तुभयमातृकः अथबांधकिनेयस्याद्बन्धुलश्चासतीसुतः कौ
लटेयःकौलटेरः ५ भिक्षुकीतुसतीयदि तदाकौलटिनेयःस्यात्कौलटेयोपिचात्मज :

अ
को
म्सं
दू:
४ 30

१ आत्मजस्तनयः सूनुः सुतः पुत्रः ५ दारकदायादौ च स्त्रियां त्वमी आहुर्दुहितरं सर्वे ५ अ
पत्यं तोकं तयोः समे संततिः संतानः प्रजा स्वजाते त्वौरसोरस्यौ १ तातस्तु जनकः पिता ३ व
प्ता च जनयित्री प्रसूर्माता जननी ३ भगिनी स्वसा १ ननांदा तु स्वसा पत्युः १ नप्त्री पौत्री सुता
त्मजा ३ भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् प्रजावती भ्रातृजाया १ मातुलानीव
ली २ पतिपत्न्योः प्रसूः श्वश्रूः १ श्वशुरस्तु पिता तयोः पितुर्भ्राता पितृव्यः स्यात् १ मातुर्भ्रा
ता तु मातुल १ स्यालास्तु भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ २ स्वस्रीयो भागिनेयः स्यात्
२ जामाता दुहितुः पतिः १ पितामहः पितृपिता १ तत्पिता प्रपितामहः १ मातुर्मातामहा
द्येवं १ सपिंडास्तु सनाभयः २ समानोदर्यसोदर्यसगर्भसहजाः समाः ४ सगोत्रबांधवज्ञा
तिबंधुस्वस्वजनाः समाः ६ ज्ञातेयं बंधुता तेषां क्रमाद्भावसमूहयोः २ धवः प्रियः पतिर्भ
र्त्ता वरयिता वरः ७ आर्यपुत्रः प्रियो नाथो २ जारस्तूपपतिः समौ १ [illegible]नारबोः केउः १स

स्स
दू:

तेभर्तरिगोलकः । भ्रात्रेयोभ्रातृजः २ भ्रातृभगिन्योभ्रातरावुभौ २ गणंपतल्लोपेस्मार्गौ
स्याद्दकजंतोस्समर्थनः सारवौविंशतीत्रिंशतः स्वैरकेयगल्लोपनः योकयोः क्लीवपे
कोस्यान्नपुंनिपट्टनीपट्टन्यदादीनामसयोगेपेकोतौतौचतेत्रिषु पुवामित्यादिके
त्वेषांस्वैर्योगोपरश्लेषतः मातापितरौपितरौमातरपितरौप्रसूजनयितारौ ४ श्वश्रू
श्वश्वरौश्वशुरौ २ पुत्रौपुत्रश्चदुहिताच दंपतीजंपतीभार्यापतीजायापतीच ४ गर्भा
शयोजरायुःस्यादुल्बंकललोस्त्रियाम् ४ सूतिमासोवैजननः २ गर्भोभ्रूणइमौ
समौ २ तृतीयाप्रकृतिःषंढः क्लीवःपंडोनपुंसकं ५ षंढः षंडोपीतिस्वामीपंडःपं
डुस्येतिच शिशुत्वंशैशवंबाल्यंतारुण्यंयौवनंसमे २ स्यात्स्थाविरंतुवृद्धत्वं २ वृ
द्धसंघेपिवार्द्धकं । पलितंजरसाशौक्ल्यंकेशादेः । विस्रसाजरा २ स्यादुत्तानशयो
डिंभः स्तनपोपिस्तनंधयः ४ बालस्तुस्यान्माणवकः वयःस्थस्तरुणोयुवा २ प्र।

अ
को
३१
31

वयाः स्थविरोवृद्धोजीनोजीर्णोजरन्‌ ६ अथ वर्षीयान्दशमीज्यायान्‌ ३ पूर्वजस्त्वग्रियो

ग्रजः ३ ज्येष्ठश्च जघन्यजेस्युः कनिष्ठयवीयोवरजाः ५ अमांसोदुर्वलश्छातः ३ बलवान्मां

सलोंसलः ३ तुंदिभस्तुंदिलस्तुंदीबृहत्कुक्षिः पिचंडिलः ५ उदरिलश्च अवटीटवनाटश्चा

वभ्राटोनतनासिके ३ केशवः केशिकः केशी ३ वलिनोवलिभः समौ २ विकलां

गस्त्वपोगंडः २ खर्वोह्रस्वश्चवामनः ३ निखर्वः खरजश्च खरणाः स्यात्खरणसो २

विग्रस्तुगतनासिकः १ खुरणाः स्यात्खुरणसः २ ह्रस्वणाः ह्रस्वनासिकः प्रज्ञुः प्रग

तजानुकः २ ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्‌ २ संज्ञुः संहतजानुकः २ स्यादेडोवधिरः १ कु

ब्जेगडुलः १ कुकरेकुणिः २ पृश्निरल्पतनौ २ श्रोणः पंगौ २ मुंडस्तुमुंडिते २ कलंवक

लवाकुकर्णिः १ खलतिस्त्वेइल्लशिकः २ वलिरः केकरे २ खोडेखंजः २ विनयश्च ३१

त्रिषुजरावराः जडुलः कालकः पिप्लु ३ तिलकस्तिलकालकः अनामयंस्यादा

रोगघ्नम् चिकित्सा रुक्प्रतिक्रिया २ भेषजौषधभैषज्यान्यगदो जायुरित्यपि ५ स्त्री रुक्(

जा चोपतापरोगव्याधिगदामयाः ७ पुमान्यक्ष्मा क्षयः शोषः ३ प्रतिश्यायस्तु पीनसः

२ स्त्री क्षुत्क्षुतं क्षवः पुंसि २ कासस्तु क्षवथुः पुमान् २ शोफस्तु श्वयथुः शोथः ३ पाद

स्फोटो विपादिकः किलाससिध्मे २ कच्छ्वां तु पामपामाविचर्चिका ४ कण्डूः खर्जूश्च कण्डू

या ३ विस्फोटः पिटकस्त्रिषु २ व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान् ४ को

ठो मण्डलकं २ कुष्ठश्वित्रे २ दुर्नामकार्शसी २ गुदजे गुदकीलकं च आनाहस्तु विब

न्धः स्यात् २ ग्रहणी रुक्प्रवाहिका २ प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ३ व्र

द्धौ वृद्धिश्च व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः ४ अश्मरी मूत्रकृच्छ्रं स्यात् २ पू

र्वे शुक्रावधेस्त्रिषु रोगहार्यगदंकारौ भिषग्वैद्यौ चिकित्सके ५ वार्तो निरामयः क

ल्य ३ उल्लाघो निर्गतो गदात् । ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः आतुरोऽभ

अ
को
ग्र
32

सितोऽंगनः १ समौ पामनकच्छुरौ २ दद्रुणो दद्रुरोगी स्यात् २ अर्शोरोगयुतोऽर्शसः २ वात
कीवातरोगी स्यात् २ सातिसारोऽतिसारकी २ स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः ४ क्लिन्ने
ऽक्ष्णि चाप्यमी ४ उन्मत्त उन्मादवति १ श्लेष्मणः श्लेष्मलः कफी ३ न्युब्जो भुग्ने रुजा २ कुब्ज
स्य वृद्धनाभौ तुंडिलतुंडिभौ २ किलासी सिध्मलः २ अंधः अदृक् २ मूर्छाले मूर्तमूर्छि
तौ ३ शुक्रं तेजो रेतसी च बीजवीर्येंद्रियाणि च ८ मायुः पित्तं १ कफः श्लेष्मा २ स्त्रियां तु
त्वगसृग्धरा १ पिशितं तरसं मांसं पललं क्रव्यमामिषम् ६ उत्तप्तं शुष्कमांसं स्यात् त
द्वल्लूरं त्रिलिंगकम् २ रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम् ७ बुक्काग्रमांसं २
हृदयं हृत् २ मेदस्तु वपा वसा २ पश्चाद्ग्रीवासिरा मन्या १ नाडी तु धमनिः सिरा ३ ति
लकं क्लोम १ मस्तिष्कं गोर्दं २ किट्टं मलोऽस्त्रियाम् २ अंत्रं पुरीतत् २ गुल्मस्तु प्ली ३५
हा पुंसि अथ वस्नसा स्नायुः स्त्रियां २ कालखंडयकृती तु समे इमे २ सृणिका स्यं।

रिनीलाला २ दूषिकानेत्रयोर्मलम् । दूषीकाव मूत्रंप्रस्रावः १ उच्चारावस्करौशमलंश
कृत् पुरीषंगूथवर्चस्कमस्त्रीविष्ठाविशौस्त्रियौ ४ स्यात्कर्परः कपालोस्त्री १ कीकसंकु
ल्यमस्थिच २ स्याच्छरीरास्थिकंकालः । करंकश्च पृष्ठास्थ्नितुकशेरुका । शिरोस्थ
निकरोटिः स्त्री । करटंच पार्श्वास्थनितुपर्शुका १ पर्शुश्च अंगंप्रतीकोवयवोपघनः
४ अथकलेवरं गात्रंवपुः संहननंशरीरंवर्ष्मविग्रहः कायोदेहः क्लीबपुंसोः स्त्रियांमू
र्तिस्तनुस्तनूः १२ पादाग्रंप्रपदं १ पादः पदंघ्रिश्चरणोस्त्रियाम् ४ तद्ग्रन्थीघुटिकेगुल्फौ
२ पुमान्पार्ष्णिस्तयोरधः । जंघातुप्रसृता १ जानूरुपर्वाष्ठीवदस्त्रियाम् २ सक्थिक्लीबेपु
मानूरुः २ तत्संधिः पुंसिवंक्षणः १ गुदंत्वपानंपायुर्ना ३ वस्तिर्नाभेरधोद्वयोः । क
टोनाश्रोणिफलकं २ कटिः श्रोणिः ककुद्मती ३ कटीरश्चपश्चान्नितम्बः स्त्रीकट्याः
। क्लीबेतुजघनंपुरः । कूपकौतुनितम्बस्थौद्वयहीनेकुकुन्दरे स्त्रियांस्फिचौकटीप्रोथौ २

अ
को
२२
33

२ प्रतस्तु उपस्थोवक्ष्यमाणयोः । भगंयोनिर्द्वयोः २ स्त्रीविह्नं स्मरसद्मं च शिश्नोमेढ्रोमेह
मेहनशेफसी ४ मुष्कः साधनं च मुष्कोऽण्डकोशो वृषणः २ पेलं च पृष्ठवंशाधरे त्रिकं । पि
चंडकुक्षी जठरोदरं तुंदम् ५ तंदिमं स्तनौ कुचौ २ चूचुकं तु कुचाग्रं स्यात् न नाक्रोडं भु
जांतरम् उरो वत्सं च वक्षश्च ५ पृष्ठं तु चरमं तनोः । स्कंधो भुजशिरोंसोस्त्री २ संधी तस्यैव जत्रु
णी । बाहुमूले उभे कक्षौ २ पार्श्वमस्त्री तयोरधः । मध्यमं चावलग्नं च मध्योऽस्त्री २ द्वौ ।
परौ द्वयोः भुजबाहू प्रवेष्टो दोः स्यात् ४ कफोणिस्तु कूर्परः २ अस्योपरि प्रगंडः स्यात्
। प्रकोष्ठस्तस्य चाप्यधः । मणिबंधादाकनिष्ठं करस्य करभो बहिः । पंचशाखः शयः
पाणिः २ हस्तः करश्च तर्जनी स्यात्प्रदेशिनी २ अंगुल्यः करशाखाः स्युः २ पुंस्यंगुष्ठः प्र
देशिनी मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ५ पुनर्भवः कररुहो नखो २२
ऽस्त्री नखरोऽस्त्रियाम् ४ कारंकशोऽपि प्रादेशतालगोकर्णास्तर्जन्यादियुते तते अंगुष्ठे

२ सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः १ पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ ३ द्वौ

संहतौ सिंहतलप्रतलौ वामदक्षिणौ । पाणिर्निकुब्जः प्रसृतिस्तौ युतावंजलिः पुमान् ।

प्रकोष्ठे विस्तृतकरे हस्तः । मुष्ट्या तु बद्धया सरत्निः स्यात् । अरत्निस्तु निष्कनिष्ठेन मुष्टिना ।

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् । ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु । कं

ठे गलः । अथ ग्रीवायां शिरोधिः कंधरेत्यपि ३ कंबुग्रीवा त्रिरेखा सा १ अवटुर्घाटा कृका

टिका ३ वक्त्रास्ये वदनं तुंडमाननं लपनं मुखम् ७ क्लीबे घ्राणं गंधवहा घोणा नासा च ना

सिका ५ कल्याणं खिनीच ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ४ अधस्ताच्चिबुकं । गं

डौ कपोलौ १ तत्परो हनुः १ रदना दशना दंता रदाः ४ तालु तु काकुदम् २ रसज्ञा रसना

जिह्वा ३ लोलाचंदिका गलशुंडिका च प्रांतावोष्ठस्य सृक्किणी १ ललाटमलिकं गोधिः

३ ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियाम् । कूर्चमस्त्री भ्रुवोर्मध्ये । तारकाक्ष्णः कनीनिका २ लोच

अ
को
३४
34

नेनयनं नेत्रमीक्षणं चक्षुरक्षिणी दृग्दृष्टी च ९ अस्त्रु नेत्राम्बु रोदनं चास्रमश्रु च ५ वाष्पश्च
अपांगौ नेत्रयोरंतौ १ कटाक्षोऽपांगदर्शने १ कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ६ उ
त्तमांगं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ५ वृजिनं च चिकुरः कुंतलो वालः कचः केशः।
शिरोरुहः ९ शिरसिजश्च तद्वृंदे कैशिकं कैश्यं अलकाश्चूर्णकुंतलाः २ कुरलाश्च ते ल
लाटे भ्रमरकाः १ काकपक्षः शिखंडकः २ कबरी केशवेशः १ अथ धम्मिल्लाः संयताः क
चा। शिखा चूडा केशपाशी ३ व्रतिनस्तु कलापार्थाः कचान्तरे ३ तनूरुहं रोम लोम ३
तद्वृद्धौ श्मश्रु पुंमुखे १ आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ५ दशैते त्रिष्वलंकर्ता।
लंकरिष्णुश्च मंडितः ३ प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ४ विभ्राड् भ्राजिष्णुरो
चिष्णू ३ भूषा तु स्यादलंक्रिया २ अलंकारस्त्वाभरणं परिष्कारो विभूषणम् मंडनं च ५
अथ मुकुटं कर्णवेष्टनम् २ कुंडलं च ग्रैवेयकं कंठभूषा २ लंबनं ल्ललंतिका २ स्वर्णैः। ३४

प्रालंविका १ अथोरःसूत्रिकामौक्तिकैःकृता। हारोमुक्तावली १ देवछंदोसौशत
यष्टिकः। हारभेदायष्टिभेदाद्गुछगुछार्धगोस्तनाः १ अर्धहारोमाणवकः। एका
वल्येकयष्टिका १ सैवनक्षत्रमालास्यात्सप्तविंशतिमौक्तिकैः। आवापकःपारिहार्यः
कटकोवलयोस्त्रियां ४ केयूरमंगदंदोर्भूषा २ अंगुलीयकमूर्मिका १ साक्षरांगुलि
मुद्रास्या। कंकणंकरभूषणम् १ स्त्रीकट्यांमेखलाकांचीसप्तकीरशनाःस्त्रियाम् ४
क्षिंजिनीकलापश्च क्लीवेसारसनंउभयोनीच वाच्यपुंस्कट्यांशृंखलंत्रिषु। पादांगदं
तुलाकोटिर्मंजीरोनूपुरोस्त्रियांहंसकःपादकटकः ४ किंकिणीक्षुद्रघंटिका १ त्व।
क्फलकृमिरोमाणिवस्त्रयोर्नुगम्। पत्रोर्णंधौतकौशेयं। बहुमूल्यंमहाधनम् १ क्षौ
मंदुकूलंस्यात् १ द्वेतुनिवीतंप्रावृतंत्रिषु २ स्त्रियांबहुत्वेवस्त्रस्यदशाःस्युर्वस्तयोर्द्वयोः
२ दैर्घ्यमानाहआयामः २ परिणाहोविशालता १ विलासस्त्वपरस्त्रंजीर्णवस्त्रं १ स।

अ
को
२५
35

२ समौनक्तककर्पटौ २ वस्त्रमाछादनंवासश्चेलंवसनमंशुकम् ८ वीनेच सुचेल
कःपटोऽस्त्रीनावरासिः स्थूलशाटकः २ अंतरीयोपसंव्यानपरिधानान्यधोंऽशुके ४ द्वौ
प्रावारोत्तरासंगौसमौबृहतिकातथा संव्यानमुत्तरीयंचचोलः कूर्पासकोऽस्त्रियाम् ५
निचोलःप्रछदपटः २ समौरल्लककम्बलौ २ नीशारस्स्यात्प्रावरणेहिमानिलनिवा
रणे १ अर्धोरुकेवरस्त्रीणांस्याच्चंडातकमंशुकम् । स्यात्त्रिष्वाप्रपदीनंतत्प्राप्नोत्याप्रप
दंहियत् । अस्त्रीवितानमुल्लोचः २ दूष्याद्यंवस्त्रवेश्मनि । अथशाह्वान्पटकुटीगुणल
यिनीस्यान्नेचप्रतिसीराजवनिकास्यात्तिरस्करिणीतिच २ परिकर्मांगसंस्कारः २।
स्यान्मार्ष्टिर्मार्जनामृजा २ पर्यंकिकापरिकरःपर्यंकश्चावसक्तिका उद्वर्तनोत्सादने
द्वेक्लीबे २ आप्लावआप्लवःस्नाने २ मज्जनेच चर्चातुचार्चिक्यंस्थासकः २ अथप्रबोधने।
अनुबोधः पत्रलेखापत्रांगुलिरिमेस्त्रियाम् २ तमालपत्रतिलकचित्रकाणिविशे २५

धकम् ४ द्वितीयंचतुरीयंचनस्त्रियाम् पुंड्रंच अथकुंकुमे कश्मीरजन्माग्निशिखंवरं।
कश्मीरजन्माग्निशिखंवरंबाह्लीकपीतनेरक्तसंकोचपिशुनेधीरलोहितचंदने ।· घुसृणे
व लाक्षाराक्षाजतुक्लीबेयावोलक्तोद्रुमामयः ६ लवंगंदेवकुसुमंश्रीसंज्ञं ३ अथजाय
कंकालीयकंचकालानुसार्यंच ३ अथसमर्थकंवंशिकागुरुराजार्हंलोहंकृमिजं।
जोंगकम् कालागुर्वगुरुस्यात २ मंगल्यमल्लिगंधियत् । यक्षधूपःसर्जरसोरालसर्व
रसावपिबहुरूपोपि ५ अथवृकधूपकृत्रिमधूपकौ तुरुष्कःपिंडकःसिल्होयावनोपि ५
अथपायसश्रीवासोवृकधूपोपिश्रीवेष्टसरलद्रवौ ५ मृगनाभिर्मृगमदःकस्तूरीच ३ अ
थकोलकंकक्कोलकंकोशफलं ३ अथकर्पूरमस्त्रियाम् घनसारश्चंद्रसंज्ञःसिता
भ्रोहिमवालुका ५ गंधसारोमलयजोभद्रश्रीश्चंदनोस्त्रियाम् ४ तैलपर्णिकगोशी
र्षेहरिचंदनमस्त्रियां ३ श्रीखंडंच तिलपर्णीतुपत्रांगंरंजनंरक्तचंदनंच।

अ
को
२९
36

५ अथजातीकोशआह्वीविलेपने २ चूर्णानिवासयोगाःस्युः २ भावितंवासितंत्रिषु २ संस्कारो
गंधमाल्याद्यैर्यःस्यात्तदधिवासनम् । माल्यंमालास्रजौमूर्ध्नि २ केशमध्येतुगर्भकः प्रभ
ष्टकंशिखालंबि । पुरोन्यस्तंललामकम् । प्रालंबमृजुलंबिस्यात् कंठात् । वैकक्षिकं
तुतत् यत्तिर्यक्क्षिप्तमुरसि । शिखास्वापीडशेखरौ २ उत्तंसश्च रचनास्यात्परिस्पंदः २
आभोगःपरिपूर्णता २ उपधानंतूपबर्हः २ शय्यायांशयनीयवत् शयनं २ तूलिकाच ।
मंचपर्यंकपल्यंकाःखट्वयासमाः ४ गेंडुकःकंदुकं २ वीटागिरिस्तु दीपःप्रदीपः २ पी
ठमासनम् २ समुद्गकःसंपुटकः २ प्रतिग्राहःपतद्ग्रहः २ प्रसाधनीकंकतिका २ पिष्टातः
पटवासकः २ दर्पणेमुकुरादर्शौ २ आत्मदर्शश्च व्यजनंतालवृंतकम् इत्यमरकोशेद्वि
तीयकांडेनृवर्गःषष्ठः ६ ॐ संततिर्गोत्रजननकुलान्यभिजनान्वयौ वंशोन्ववायः २९
संतानः ९ वर्णास्युर्ब्राह्मणादयः । विप्रक्षत्रियविट्शूद्राःचातुर्वर्ण्यमितिस्मृतं । राज

वीजीतस्तु वंश्यः २ वीज्यस्तु कुलसंभवः २ महाकुलकुलीनार्य्यसभ्यसज्जनसाधवः ६ ब्र
ह्मायनः पुण्यजनस्तु ब्रह्मचारी गृही वानप्रस्थो भिक्षुः चतुष्टये आश्रमोऽस्त्री । द्विजात्यग्र
जन्मभूदेववाडवाः विप्रश्च ब्राह्मणः ६ असौ षट्कर्मा यागादिभिर्युतः । विद्वान्विपश्चिद्दो
षज्ञः सन्सुधीः कोविदो बुधः धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः धीमान्सूरिः
कृती कृष्टिर्लब्धवर्णो विचक्षणः दूरदर्शी दीर्घदर्शी २२ श्रोत्रियच्छान्दसः समौ २ उपाध्या
योऽध्यापकः अथ स्यान्निषेकादिकृद्गुरुः २ मंत्रव्याख्याकृदाचार्यः । आदेष्टा त्वध्वरे व्रती
यष्टा च यजमानः ३ अथ स सोमवति दीक्षितः २ इज्याशीलो यायजूकः २ यज्वा तु विधिने
ष्टवान् । बृहस्पतीष्ट्या स्थपतिः । सोमपीथी तु सोमपः २ सर्ववेदाः स येनेष्टः क्रतुः सर्वस्व
दक्षिणः । अनूचानः प्रवचने सांगेऽधीती २ गुरोस्तु यो लब्धानुज्ञः समावृत्तः । सुत्वा त्वभि
षवे कृते । छात्रान्तेवासिनौ शिष्ये २ शैक्षाः प्राथमकल्पिकाः २ एकब्रह्मव्रताचारा मिथः

अं
को
२
37

सब्रह्मचारिणः । सतीर्थ्यास्त्वेकगुरवः । चितवानग्निमग्निचित् । पारम्पर्योपदेशेस्यादैतिह्य
मितिहाव्ययम् २ मीमांसकोजैमिनीयोवेदान्तीब्रह्मवादिनि वैशेषिकःस्यादैतिह्यमितिहा
व्ययम् २ मीमांसकोजैमिनीयेवेदौलूक्यः २ सौगतःशून्यवादिनि २ नैयायिकस्त्वाक्षपादः
। स्यात्स्याद्वादिकआर्हतः २ चार्वाकलौकायतिकौ २ सत्कार्येसांख्यकापिलौ २ उपज्ञा ।
ज्ञानमाद्यंस्यात् । ज्ञात्वारम्भउपक्रमः । यज्ञःसवोऽध्वरोयागः सप्ततन्तुर्मखःक्रतुः २ पाठोहो ।
मश्चातिथीनांसपर्यातर्पणंबलिः एतेपंचमहायज्ञाब्रह्मयज्ञादिनामकाः ५ समज्यापरिष
द्गोष्ठीसभासमितिसंसदः आस्थानीक्लीवमास्थानंस्त्रीनपुंसकयोःसदः ४ प्राग्वंशःप्रा
ग्घविर्गेहात् । सदस्याविधिदर्शिनः २ सभासदःसभास्ताराः सभ्याःसामाजिकाश्चते ४ पा
र्षद्याःश्चास्य अध्वर्यूद्गातृहोतारोयजुःसामर्ग्विदःक्रमात् २ अग्नीध्राद्याधनैर्वार्याऋत्विजो
याजकाश्चते २ वेदिःपरिष्कृताभूमिः । समेस्थण्डिलचत्वरे २ चषालोयूपकटकः २ कुम्भा १२

स्रुगद्रुनाहुतिः। यूपाग्रं तर्म निर्मथ्यदारुणि त्वरणिर्द्वयोः। दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रे।
योग्नयः २ अग्नित्रयमिदं त्रेता। प्रणीतः संस्कृतोनलः समूह्यपरिचाय्योपचाय्याग्नौप्रयो
ग्नयः २ अग्नित्रयमिदं त्रेता। प्रणीतः संस्कृतोनलः समूह्यपरिचाय्योपचाय्याग्नौप्रयोगिणः
२ योगार्हपत्यादानीयदक्षिणाग्निः प्रणीयते तस्मिन्नानाय्यः। अग्नायीस्वाहाचहुतभुक्
प्रियाऋक्सामिधेनीधाय्याचयास्यादग्निसमिंधनी। गायत्रीप्रमुखंछंदो। हव्यपाकेचरुः
पुमान्। आमिक्षासाशृतोष्णेयाक्षीरेस्याद्दधियोगतः। धवित्रंव्यजनंतद्यद्रचितंमृगचर्म
णा। पृषदाज्यंसदध्याज्ये। परमान्नंतुपायसम् २ हव्यकव्येदैवपित्र्येअन्ने २ पात्रंस्रुवा।
दिकं। ध्रुवोपभृज्जुहूर्नतुस्रुवोभेदाः स्रुचः स्त्रियः उपाकृतः पशुरसौयोभिमंत्र्यक्रतौ।
हतः। परंपराकंशमनंप्रोक्षणं च वधः २ वाच्यलिंगाः प्रमीतोपसंपन्नप्रोक्षिताहते
सांनाय्यंहविः २ अग्नौतुहुतंत्रिषुवषट्कृतं। दीक्षांतोवभृथोयज्ञे। तत्कर्मार्हंतुयज्ञि

अ
को
१९
२८

यं त्रिषु । अथ क्रतुकर्मेष्टं । पूर्तं खातादिकर्म यत् । अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ त्या
गो विहायितं दानमुत्सर्जनविसर्जने विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् प्रादेशनं निर्वप
णमपवर्जनमंहतिः ॥ उत्सर्गश्च मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकं पितृदानं निवापः स्या
त् ॥ श्राद्धं तत्कर्म शास्त्रतः । अन्वाहार्यं मासिके । अंशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् । पर्येषणा
परीष्टिश्चान्वेषणा च गवेषणा ॥ याच्ञाभिशस्तिर्याचनार्थना ॥ षट् तु त्रिषु अर्घ्यमर्घार्थे ।
पाद्यं पादाय वारिणि । क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि ॥ स्यादावेशिक आगन्तु
रतिथिर्ना गृहागते ॥ प्राघुणाभ्युत्थानं तु गौरवम् ॥ पूजा नमस्यापचितिः सपर्यार्चार्हणाः स
माः वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम् ॥ परिव्रज्या तु पर्यटनं भवेद्व्रज्या विशाखिका व्र
ज्याटाट्या पर्यटने ॥ चर्या त्वीर्यापथस्थितिः । उपस्पर्शस्त्वाचमनम् ॥ अथ मौनमभाषणम् १९
॥ प्राचेतसश्चादिकविः स्यान्मैत्रावरुणिश्च सः वाल्मीकिश्च ॥ अथ गाधेयो विश्वामित्रश्च ।

कौशिकः २ व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः ४ आनुपूर्वी स्त्रियां वावृत्परिपा
टी अनुक्रमः पर्यायश्च ५ अतिपातस्तु पर्यय उपात्ययः ३ क्रमोल्लंघनमतिक्रमश्च नि
यमो व्रतमस्त्री २ तच्चोपवासादि पुण्यकम्। औपवस्तं तूपवासः २ विवेकः पृथगा
त्मता २ स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिः। अथांजलिः। पाठे ब्रह्मांजलिः। पाठे विप्रु
षो ब्रह्मबिंदवः। ध्यानयोगासने ब्रह्मासनम्। कल्पे विधिक्रमौ मुख्यः स्यात्प्रथमः क
ल्प। अनुकल्पस्तु ततोऽधमः। संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः। समे तु पादग्र
हणमभिवादनमित्युभे २ भिक्षुः परिव्राट् कर्मंदी पाराशर्यपि मस्करी ५ तपस्वी ता
पसः पारिकांक्षी २ वाचंयमो मुनिः २ तपःक्लेशसहो दांतः २ वर्णिनो ब्रह्मचारिणः २
ऋषयः सत्यवचसः। स्नातकस्त्वाप्लुतो व्रती २ ये निर्जितेंद्रियग्रामा यतिनो यतयश्च
ते २ यः स्थंडिले व्रतवशाच्छेते स्थंडिलशाय्यसौ स्थांडिलश्च २ अथ विरजस्तमसः स्यु

श्री
को
४९
39

द्वयातिगाः २ पवित्रः प्रयतः पूतः २ शुचिः शुद्धः पावनश्च पाषंडाः सर्वलिंगिनः २
पालाशो दंड आषाढो व्रते । रंभस्तु वैणवः । अस्त्री कमंडलुः कुंडी २ व्रतिनामासनं वृ
सी । अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदंबकम् । स्वाध्यायः स्याज्जपः २ सुत्याभिषवः
सवनं च सा २ सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् । दर्शश्च पौर्णमासश्च यागौ ।
पक्षांतयोः पृथक् २ शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः । नियमस्तु स यत्कर्म
नित्यमागंतुसाधनं । शैवः शैवोर्ध्वस्रोतसिकः सिद्धांती शुद्धमार्गिकः पांवालिकः पा
शुपतो नाकुलोय महाव्रती कपाली सोमसिद्धांती तांत्रिकः स्याद्विशेषहृत्क यामलो
द्वयमार्गः स्यात्त्रिकवेदी षडर्विकः पूर्वाम्नायी महामार्गी भैरवी दक्षिणागमी श्रा
क्तो वामस्रोतसिकः कौलश्चाम्नायिकः पूर्वी समी एकायनः सात्वतश्च वैष्णवः पां ४९
चरात्रिकः रक्तांबरो भदंतश्च श्रमणः क्षपणः श्रवणभिक्षुकाः भिक्षुः श्वेतः श्वेतपटः क्षपण

स्मोदिगंबरः नग्नाटःश्रावकोऽन्तेवासीकोनिर्ग्रंथोजीवजीवकौ तौरंतभट्टाकरणेन
दंतेनपवनेनविधु ४ कन्थापटीचकौपीनंचगटीवल्लीतिलक्षणः ५ उपवीतंयज्ञसूत्रं।
प्रोद्धृतेदक्षिणेकरे २ प्राचीनावीतमन्यस्मिन्। निवीतंकण्ठलंबितं। अङ्गुल्यग्रेतीर्थं।
दैवं। स्वल्पाङ्गुल्योर्मूलेकायं २ मध्येऽङ्गुष्ठाङ्गुल्योःपित्र्यं। मूलेत्वङ्गुष्ठस्यब्राह्मं स्या
द्ब्रह्मभूयंब्रह्मत्वंब्रह्मसायुज्यमित्यपि २ देवभूयादिकंतद्वत् कृच्छ्रंसांतपनादिकम्
संन्यासवत्यनशनेपुमान्प्रायः। अथवीरहानष्टाग्निः २ कुहनाल्लोभान्मिथ्येर्या।
पथकल्पना व्रात्यःसंस्कारहीनःस्यात् २ अस्वाध्यायोनिराकृतिः २ धर्मध्वजीलिं
गवृत्तिः अवकीर्णीक्षतव्रतः २ सुप्तेयस्मिन्नस्तमेतिसुप्तेयस्मिन्नुदेतिच अंशुमान
भिनिर्मुक्ताभ्युदितौचयथाक्रमम् २ परिवेत्तानुजेऽनूढेज्येष्ठेदारपरिग्रहात्। प
रिवित्तिस्तुतज्ज्यायान्। विवाहोपयमौसमौ तथापरिणयोद्वाहोपयामाःपाणि

अ
को
५.
50

पीडनम् ८ व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ५ सुरतं मोहनं संप्रयोगश्च त्रिवर्गो
धर्मकामार्थैः। चतुर्वर्गः समोक्षकैः। सबलैस्तैश्चतुर्भद्रम्। जन्याः स्निग्धा वरस्य ये
इत्यमरकोशे द्वितीयकाण्डे ब्रह्मवर्गः सप्तमः ७ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रि
यो विराट् ५ राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ७ राजा तु प्रणताशेषसामन्तः
स्यादधीश्वरः चक्रवर्ती सार्वभौमः ३ रामो दाशरथी रावणारिः काकुत्स्थ राघवः सौ
मित्रिर्लक्ष्मणो लङ्कापतिः पौलस्त्यः रावणः दशास्यः ४ अथेन्द्रजिन्मेघनादो मन्दो
दरीसुतः ३ किष्किन्धाधिपः सुग्रीवो १ हनुमान्मारुतात्मजे १ हैडम्बस्तु घटोत्कचो १ अ
जातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः ४ राधेयोऽङ्गाधिपः कर्णो ३ भीमसेनो हिडिम्ब
भित् मारुतिः कीचकारातिर्बकवैरी वृकोदरः ८ धनंजयोऽर्जुनः पार्थः विजयः श ५.
क्रनन्दनः गाण्डीवी फाल्गुनः सव्यसाची मध्यमपाण्डवः जिष्णुः किरीटी बीभत्सुः श्वेत।

वानीकपिध्वजः ।४ पृथाऽऽकुंतीनकुलसान्नपांचालीयात्तसेन्यपिद्रौपदीविक्रमादित्यः सा
हसांकः शकांतकः ।२ सूद्रकस्त्वग्निमित्रोनाहालः स्यात्सालवाहनः ।४ वैरोचनिर्बलिः ।२
कार्त्तवीर्योर्जुनः सहस्रदोः ।२ नृपोन्योमंडलेश्वरः ।१ येनेष्टंराजसूयेनमंडलस्येश्वरश्चयः शा
स्तियश्चाज्ञयाराज्ञः ससम्राट् ।१ अथराजकंराजन्यकंचनृपतिक्षत्रियाणांगणेक्रमात् ।१
मंत्रीधीसचिवोमात्यः सामवायिकोपि अन्येकर्मसचिवास्ततः ।१ महामात्राः प्रधानानि
पुरोधास्तुपुरोहितः ।२ द्रष्टरिव्यवहाराणांप्राड्विवाकाक्षदर्शकौ ।२ धर्माधिकरणिकः ।
स्थानपाटलिकश्च प्रतीहारोद्वारपालद्वास्थद्वास्थितदर्शकाः ।५ दंडीदौवारिकोवेत्री
।३ उद्रावकस्थरादिवर्गस्त्वनीकस्थः ।१ अथाध्यक्षाधिकृतौसमौ स्थायुकोधिकृतोग्रामे ।
गोपोग्रामेषुभूरिषु ।१ भौरिकः कनकाध्यक्षे ।२ रूप्याध्यक्षस्तुनैष्किकः ।२ अंतःपुरेत्वधि
कृतः स्यादंतर्वंशिकोजनः ।१ सौविदल्लाः कंचुकिनः स्थापत्याः सौविदाश्चते ।४ षंढोव

अ
को
८।

ढवरस्तुल्यौ २ शंठश्च सेवकार्थ्यनुजीविनः २ विषयानंतरो राजा शत्रुः १ मित्रमतः परं। उ-
दासीनः परतरः। तद्यस्तु पार्ष्णिग्राहस्तु पृष्ठतः। रिपौ वैरिसपत्नारिसपत्नारिद्विषद्द्वेषणदु-
र्हृदः द्विड्विपक्षाहितामित्रदस्युशात्रवशात्रवः अभिघातिपरारातिप्रत्यर्थिपरिपंथिनः
१९ आत्स्थासहनद्वेषिविजिंगाह्वसमनीकिनस्तु वयस्यः स्निग्धसवया २ अथ मित्रं सखा सुहृ-
त् २ सख्यं साप्तपदीनं स्यात् २ सौहार्दं सौहृदं सौहृदख्यं अनुरोधोनुवर्तनं य-
थार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः चारश्च गूढपुरुषः १ आप्तः प्रत्ययितस्त्रिषु २ सां-
वत्सरो ज्योतिषिको दैवज्ञगणकावपि स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि ८
तांत्रिको ज्ञातसिद्धांतः २ सत्री गृहपतिः समौ २ लिपिकारोक्षरचणोक्षरचुञ्चुश्च लेखके
४ लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ २ स्यात्संदेशहरो दूतः २ दूत्यं तद्भावकर्म ८।
णि। अध्वनीनोध्वगोध्वन्यः पांथः पथिक इत्यपि ५ स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबला

निचराज्यांगानि ७ प्रकृतयः पौराणां श्रेणयोपि च । संधिर्नाविग्रहो यानमासनं द्वैधमाश्र

यः षड्गुणाः ६ शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः ३ क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीति।

वेदिनाम् स प्रतापः प्रभावश्च यत्तेजः कोशदंडजम् २ सामदाने भेददंडावित्युपायचतुष्ट

यम् ४ साहसं तु दमो दंडः २ साम सान्त्वं २ अथो समौ भेदोपजापौ २ उपधा धर्माद्यैर्यत्परी

क्षणम् । पंच त्रिषु अषडक्षीणो यस्तृतीयाद्यगोचरः । विविक्तविजनच्छन्ननिःशलाका

स्तथा रहः रहश्चोपांशु चालिंगे ७ रहस्यं तद्भवे त्रिषु । समौ विस्रंभविश्वासौ २ आश्वासस्तु

भ्रेषो भ्रंशो यथोचितात् । अभ्रेषन्यायकल्पास्तु देशरूपं समंजसम् ५ युक्तमौपयिकं

लभ्यं भजमानाभिनीतवत् न्याय्यं च त्रिषु षट् ६ संप्रधारणा तु समर्थ

नम् २ अववादस्तु निर्देशो निदेशः शासनं च सः शिष्टिश्चाज्ञा च ६ संस्था तु मर्यादा धार

णा स्थितिः ४ आगोऽपराधो मंतुश्च ३ समे तु दानबंधने २ द्विपाद्यो द्विगुणो दं

अ
को
४२

52

शे। भागधेयः करो बलि २ घट्टादिदेयं शुल्कोस्त्री। प्राभृतं तु प्रदेशनम् उपायनमुपग्रा
ह्यमुपहारस्तथोपदा ६ कौशलिका ढौकनं च यौतकादि तु यद्देयं सुदायो हरणं च तत्
२ तत्कालस्तु तदात्वं स्यात् २ स्यादायतिः काल उत्तरः सांदृष्टिकं फलं सद्य उदर्कः फलमु
त्तरं। अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम्। महीभुजामहिभयं स्वपक्षप्रभवं भयम्।
प्रक्रिया त्वधिकारः स्यात् २ चामरं तु प्रकीर्णकं नृपासनं तु यद्भद्रासनं २ सिंहासनं तु तत्।
हैमं। छत्रं त्वातपत्रं २ राजस्तु नृपलक्ष्म तत्। भद्रकुंभः पूर्णकुंभः २ भृंगारः कनकालु
का २ निवेशः शिबिरं षंढे २ स्कंधावारः सैन्यावासश्च सज्जनं तूपरक्षणम् २ गुल्मक
म् हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयम् दंती दंतावलो हस्ती द्विरदोनेकपो द्विपः
मतंगजो गजो नागः कुंजरो वारणः करी इभः स्तंबेरमः पद्मी १५ सामजः सिंधुरः कुंभी
व यूथनाथस्तु यूथपः २ मदोत्कटो मदकलः २ कलभः करिशावकः २ प्रभिन्नो गर्जि
४२

नोमत्तो ३ समावुद्वांतनिर्मदौ २ हास्तिकंगजतावृंदे १ करिणीधेनुकावशा ३ गंडःकटोम
दोदानं ४ दंतिनाः वमथुःकरशीकरः २ कुंभौतुपिंडौशिरसः २ तयोर्मध्येविदुःपुमान् । अ
वग्रहोललाटंस्यात् ४ ईषिकात्वक्षिकूटकम् । अपांगदेशोनिर्याणं । कर्णमूलंतुचूलि
का । अधःकुंभस्यवाहित्थंप्रतिमानमधोस्यच । आसनंस्कंधदेशःस्यात्पद्मकंबिंदुजा
लकम् । पक्षभागःपार्श्वभागो २ दंतभागस्तुयोग्रतः । द्वौपूर्वपश्चाज्जंघादिदेशौगात्राव
रेक्रमात् २ तोत्रंवैणुकंआलानंबंधस्तंभे २ अथशृंखलेअंदुकोनिगडोस्त्रीस्यात् ३ अं
कुशोस्त्रीसृणिःस्त्रियाम् दूष्याकक्ष्यावरत्रास्यात् ३ कल्पनासज्जनासमे २ प्रवेण्यास्तरणे
वर्णः परिस्तोमःकुथोद्वयोः ५ वीतंत्वसारंहस्त्यश्वं । वारीतुगजबंधनी २ घोटकेवी
तितुरगतुरंगाश्वतुरंगमाः वाजिवाहार्वगंधर्वहयसैंधवसप्तयः ।१३ आजानेयाःकु
लीनाःस्युः २ विनीताःसाधुवाहिनः २ वनायुजाःपारसिकाःकंबोजाबाह्लिकाहयाः

अ ४ वाह्लीकयवुरश्वोश्वमेधीयः । जवनस्तुजवाधिकः २ प्रजवीच पृष्ठ्यः स्थौरी २ सितः
को कर्कः । रथ्योवोढारथस्ययः । बालः किशोरः वाम्यश्वावडवा ३ वाडवंगणे २ त्रिह्याश्वी
५२ 53 नेयदश्वेनदिनेनैकेनगम्यते । कश्यंतुमध्यमश्वानां । हेषाह्रेषाचनिःस्वनः । निगाल
स्तुगलोद्देशः । वृंदेत्वश्वीयमाश्ववत् २ पर्याणंपल्ययनकं २ वल्गारश्मिकशासमाः
३ आस्कंदितंधौरितकंवल्गितंरेचितंप्लुतम् गतयोमूःपंचधाराः ५ घोणातुप्रोथमस्त्रि
याम् २ कविकातुखलीनोस्त्री २ शफंक्लीवेखुरःपुमान् २ पुच्छोस्त्रीलोमलांगूले ३
वालहस्तश्चवालधिः २ त्रिषुपावृत्तलुठितौपरावृत्तेमुहुर्भुवि २ यानेचक्रिणियुद्धार्थे
शतांगः स्यंदनोरथः ४ असौपुष्परथश्चक्रयानंनसमराययत् । कर्णीरथः प्रवहणंडु
यनंचसमंत्रयम् क्लीवेनःशकटोस्त्रीस्यात् । गंत्रीकम्बलिवाह्यकम् २ शिविका। ५२
याप्ययानंस्यात् २ दोलाप्रेंखादिकाःस्त्रियाम् २ उभौतुद्वैपवैयाघ्रौद्वीपिचर्मावृतेरथे

पांडुकंबलसंवीतः स्यंदनः पांडुकम्बली । योग्योरथो वैनयिकस्याध्वगः पारियात्रिकः ४
रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते । अस्त्रो चूल्लावचूलावचूलाख्याद्धीधोंग्राव
क्षचेको २ त्रिषु द्वैपादयो रथ्यौ रथकट्या रथव्रजे २ धूःस्त्री क्ले यानमुखं २ स्याद्रथांगमप
स्करः २ चक्रं रथांगं २ तस्यांते नेमिः स्त्री स्यात्प्रधिः पुमान् २ पिंडिका नाभिः २ अक्षाग्रकी
लके तु द्वयोरणिः । रथगुप्तिर्वरूथो ना २ कूबरस्तु युगंधरः २ अनुकर्षो दार्वधःस्थम् । प्रा
संगो ना युगाद्युगः । सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् परम्पराहनं यत्स्याद्वैनीतक
मस्त्रियाम् । आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ४ नियंता प्राजिता यंता सूतः
का हस्त्यारोहा निषादिनः ४ नियंता प्राजिता यंता सूतः क्षत्ता च सारथिः सव्येष्ठदक्षिणस्थौ च
संज्ञा रथकुटुंबिनः ८ रथिनः स्यंदनारोहाः २ अश्वारोहास्तु सादिनः २ भटा योधाश्च योद्धा
रः २ सेनारक्षास्तु सैनिकः २ सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते बलिनो ये सहस्रे

अ णतेसहस्राःसहस्रिणः १ परिधिस्थःपरिचरः १ सेनानीर्वाहिनीपतिः १ कंचुकोवारबा।
को णोस्त्री १ यत्तुमध्येसकंचुकाः बध्नंतितत्सारसनमधिकांगः १ अथशीर्षकंशीर्षण्यंचशिर
४४ स्त्रेथ १ तनुत्रंवर्मदंशनं उरश्छदःकंकटकोजगरःकवचोस्त्रियाम् २ आमुक्तःप्रतिमुक्त
45 श्चपिनद्धवत् ४ सन्नद्धोवर्मितःसज्जोदंशितोव्यूढकंकटः ५ त्रिष्वामुक्तादयःवर्मभृतांका
वचिकंगणे १ पदातिपत्तिपदगपादातिकपदाजयः पद्गश्चपदिकश्च २ अथपादातंपत्तिसंहतिः १ श
स्त्राजीवीकांडपृष्ठायुधीयायुधिकाःसमाः ४ कृतहस्तःसुप्रयोगविशिखःकृतपुंखव
त् १ अपराद्धपृषत्कोसौलक्ष्याद्यःच्युतसायकः धन्वीधनुष्मान्धानुष्कोनिषंग्यस्त्रीधनुर्ध
रः ५ स्यात्कांडवान्कांडीरः शाक्तीकःशक्तिहेतिकः १ याष्टीकपारश्वधिकौयष्टिप
र्श्वधहेतिकौनैस्त्रिंशिकोसिहेतिःस्यात् १ समौप्रासिककौंतिकौ १ चर्मीफलकपा। ४४
णिःस्यात् १ पताकीवैजयंतिकः १ अनुप्लवःसहायश्चानुचरोभिचरःसमाः ४ पुरोगाग्रे

सरप्रष्ठाग्रतःसरपुरःसरः पुरोगमः पुरोगामी ७ मंदगामी तु मंथरः जंघालोतिजवस्तुल्यौ र

जंघाकरिकजांघिकौ २ तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ६ जय्यो यः शक्यते जेतुं ।

जेयो जेतव्यमात्रके । जैत्रस्तु जेता २ यो गच्छत्यलं विद्विषतः प्रति सोऽभ्यमित्रोऽभ्यमित्रीयो

ऽप्यभिमित्रीण इत्यपि ३ ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जोतिशयान्वित । २ स्यादुरस्वानुरसि

लः २ रथिको रथिनो रथी ३ कामंगाम्यनुकामीनो ऽपि २ अत्यंतीनस्तथाभृशगाम् । शूरो वी

रश्च विक्रांतो ३ जेता जिष्णुश्च जित्वरः ३ सांयुगीनो रणे साधुः । शस्त्राजीवोदयधिष्ठ ध

जिनी वाहिनी सेना पृतनानीकिनी चमूः वरूथिनी ७ बलं सैन्यं चक्रं चानीकमस्त्रियाम् व्यू

हस्तु बलविन्यासः । भेदा दंडादयो युधि ४ प्रत्यासारो व्यूहपार्ष्णिः २ सैन्यपृष्ठे प्रति

ग्रहः । एकेभैकरथा त्र्यश्वा पत्तिः पंचपदातिका । पत्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्त

रं सेनामुखं । गुल्मगणौ २ वाहिनी । पृतना । चमूः । अनीकिनी । दशानीकिन्यक्षौहि

अमरे को ४५ 45

ली। १ अथसंपदिसंपत्तिः श्रीश्चलक्ष्मीश्च ४ विपत्त्यांविपदापदौ ३ आयुधंतुप्रहरणंश।
स्त्रमस्त्रं ५ हेतिश्च अथास्त्रियौ धनुश्चापौधन्वशरासनकोदंडकार्मुकम् इष्वासोपि ७ अ।
स्य अर्थकर्णस्यकालपृष्ठंशरासनम्। कपिध्वजस्यगांडीवगांडिवौपुंनपुंसके १ को
टिरस्याटनिः १ गोधातलेज्याघातवारणे १ लस्तकस्तुधनुर्मध्यं। मौर्वीज्याशिंजिनीगुणः
४ स्त्रीबाव स्यात् प्रत्यालीढमालीढमित्यादिस्थानपंचकम् लक्षंलक्ष्यंशरव्यंच ३ श
राभ्यासउपासने पृषत्कबाणविशिखा अजिह्मगखगाशुगाः कलम्बमार्गणशराः पत्री
रोपइषुर्द्वयोः कलम्बोवत्सदंतश्चवाजीभल्लश्चवानवान् शिलीमुखः स्वर्णपुंखः साय
कोयोस्त्रवःशरः निकृतेल्लीदणमार्गोपिक्षुरश्चवर्माचसायकः प्रक्ष्वेडनास्तुनाराचाः २
पक्षोवाजः १ त्रिषूत्तरे निरस्तःप्रहितेबाणे। विषाक्तेदिग्धलिप्तकौ १ तूणोपासंगतूणी ४५
रनिषंगाइषुधिर्द्वयोः तूण्यां ६ कलापश्च खड्गेतुनिस्त्रिंशचंद्रहासासिरिष्टयः कौक्षेयको

मंडलाग्रः करवालः कृपाणवत् त्सरुः खड्गादिमुष्टौ स्यात्। मेखलातन्निबंधनम्। फ
लकोस्त्रीफलंचर्म ३ संग्राहोमुष्टिरस्ययः १ द्रुघणोमुद्गरघनौ ३ स्यादेलीकरवालिका
२ भिंदिपालःसृगस्तुल्यौ २ परिघःपरिघातनः द्वयोःकुठारःपरशुःस्वधितिस्तुपरश्वधः
४ स्यात्शस्त्रीचासिपुत्रीचछुरिकाचासिधेनुका ४ वापुंसिशल्यंशंकुर्नासर्वलातोमरो
ऽस्त्रियां प्रासस्तुकुंतःकोणस्तुस्त्रियःपाल्यश्रिकोटयः ४ सर्वाभिसारःसर्वौघःसर्वसन्न
हनार्थकः २ लोहाभिसारोस्त्रभृतांराज्ञांनीराजनाविधिः। यत्सेनयाभिगमनमरौस्याद
भिषेणनं। यात्राव्रज्याभिनिर्याणंप्रस्थानंगमनंगमः ६ स्यादासारःप्रसरणं २ प्रचक्रंच
लितार्थकम् २ अहितान्प्रत्यभीतस्यरणेयानमभिक्रमः। वैतालिकाबोधकराः चा
क्रिकाघंटिकार्थकाः २ स्युर्मागधास्तुमगधा २ बंदिनःस्तुतिपाठकाः २ संशप्तकास्तु
समयात्संग्रामादनिवर्तिनः। रेणुर्द्वयोःस्त्रियांधूलिःपांसुर्नानद्वयोरजः ४ चूर्णेक्षोदः २

अ समुत्पिंजपिंजलौभृशमाकुले ॥ पताकावैजयंतीस्यात्केतनंध्वजमस्त्रियाम् ४ सावीरा
को शंसनंयुद्धभूमिर्यातिभयप्रदा अहंपूर्वमहंपूर्वमित्यहंपूर्विकास्त्रियाम् । आहोपुरुषिका
४८ दर्पाद्यास्यात्संभावनात्मनि । अहमहमिकातुसास्यात्परस्परंयोभवत्यहंकारः । द्रविणं
96 तरःसहोबलशौर्याणिस्थामशुष्मंच ७ शक्तिःपराक्रमःप्राणः २ विक्रमस्त्वतिशक्तिता
। वीरपाणंतुयत्पानंवृत्तेभाविनिवारणे १ युद्धमायोधनंजन्यंप्रधनंप्रविदारणम् मृधमा
स्कंदनंसंख्यंसमीकंसाम्परायिकम् अस्त्रियांसमरानीकरणाःकलहविग्रहौसंप्रहारा
भिसंपातकलिसंस्फोटसंयुगाः अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः समुदायः।
स्त्रियांसंयत्समित्याजिसमिद्युधः । नियुद्धंबाहुयुद्धेस्यात् । तुमुलंरणसंकुले । क्ष्वेडातु।
सिंहनादःस्यात् १ करिणांघटनाघटा । क्रंदनंयोधसंरावः २ बृंहितंकरिगर्जितंविस्फा ४८
रोधनुषःस्वानः । पटहाडंबरौसमौ १ प्रसभंतुबलात्कारोहठः १ अप्यवमर्दस्तुपीडनम् ४

भ्यवस्कंदनंत्वभ्यासादनं १ विजयोजयः १ वैरशुद्धिःप्रतीकारोवैरनिर्यातनंचसा ३ प्र
द्रावोद्द्रावसंद्रावाःसंदावोविद्रवोद्रवः अपक्रमोपयानंच ८ रणेभंगःपराजयः १ पराभ
वस्तु पराजितपराभूतौत्रिषु १ नष्टतिरोहितौ १ प्रमापणंनिबर्हणंनिकारणंविशारणंप्र
वासनंपरासनंनिषूदनंनिहिंसनम् निर्वासनंसंज्ञपनंनिर्ग्रन्थनमपासनं निस्तर्हणं
निहननंक्षणनंपरिवर्जनम् निर्वापणंविशसनंमारणंप्रतिघातनम् उद्वासनंप्रमथ
नक्रथनोज्जासनानिच आलंभपिंजविशरघातोन्मथवधाअपि २ व्यापादनंविशस
नंकिटनंचनिर्बर्हणं ४ स्यात्पंचताकालधर्मोदिष्टान्तःप्रलयोत्ययः अंतोनाशोद्व
योर्मृत्युःमरणंनिधनोस्त्रियाम् प्रमयोक्षीदीर्घनिद्राहिंसासंस्थानिमीलनं ५ प
रासुप्राप्तपंचत्वपरेतप्रेतसंस्थिताः मृतप्रमीतौत्रिष्वेते २ चिताचित्याचितिःस्त्रियां
२ कबंधोस्त्रीक्रियायुक्तमपमूर्धकलेवरम् श्मशानंस्यात्पितृवनं १ कुणपःशवा

अ
को
४०
47

स्यादे ध्रुतवासः प्रेतवने २ क्षणपः शवमस्त्रियाम् २ प्रग्रहोपग्रहौ बंद्यां २ कारास्याद्
बंधनालये । पुंसिभूम्न्यसवः प्राणाश्चैवं । जीवोसुधारणं जीवाच आयुर्जीवितकालो ना
२ जीवातुर्जीवनौषधम् २ इत्यमरकोशे द्वितीयकांडे क्षत्रियवर्गः अथ ॐ ऊरव्या
ऊरुजा आर्या वैश्या भूमिस्पृशो विशः आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ८ स्त्रियां
कृषिः । पाशुपाल्यं । वाणिज्यं च । इति वृत्तयः सेवाश्ववृत्तिः अनृतं कृषिः । उञ्छशिलमृत
म् २ द्वे याचितायाचितयोर्यथासंख्यं मृतामृते २ सत्यानृतं वणिग्भाव २ स्यादृणं पर्युदंच
नं उद्धारः २ अर्थप्रयोगस्तु कुसीदं वृद्धिजीवने २ याच्ञयाप्तं याचितकं २ निमयादापमित्य
कम् । उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् हावलम् २ प्रस्फोटनं शूर्पमस्त्री । चा
लनं तितउः पुमान् २ परिपवनं च स्यूतप्रसेवौ २ प्रसेवकस्य कंडोलपिटौ २ पिटकस्तु क ४०
टकि लिंजरौ समानौ २ रसवत्यां तु पाकस्थानं महानसे २ पौरोगवस्तदध्यक्षः २ सूपका

गल्लवल्लवाः २ आरालिकाआंधासिकाः सूदाऔदनिकागुणाः ५ भक्षकाराश्च आपूपिकः कां
दविको भक्ष्यकारः ३ इमे त्रिषु अश्मंतमुद्धानमधिश्रयणी चुल्लिरंतिका ५ अंगारधानिकां
गारशकटस्यपि हसंतिका हसंत्यपि ४ मग्नाग्निकाच अथन स्त्री स्यादंगारः अलातमुल्मुक
मू २ क्लीवेम्बरीषं भ्राष्ट्रो ना २ कंडुर्वा स्वेदनी स्त्रियाम् २ अलिंजरः स्यान्मणिकं २ कर्करीयालू
र्गलंतिका पिठरः स्थाल्युखाकुंडं ४ कलशस्तु त्रिषु द्वयोः घटः कुटो निपावस्त्री ४ शरावो
वर्धमानकः २ थालाजिरश्च ऋजीषं पिष्टपचनं २ कंसो ऽस्त्री पानभाजनं २ मल्लिकाचीटि
काच पात्रामत्राचभाजनम् ३ दर्विः कंविः खजाकाच ३ स्यात्तर्दूर्दारुहस्तकः १ अस्त्री
शाकं हरितकं शिग्रुः ३ अस्यतु नालिका कडम्बश्च कलम्बश्च ३ वेषवार उपस्करः २ तिं
तिडीकं चत्रं चुक्रं च वृक्षाम्लं ३ अथ वेल्लजं मरिचं कोलकं कृष्णमूषणं धर्मपत्तनम् ६ जीरको
जीरणो ऽजाजी कणा ४ कालेजाजी तु सुषवी कारवी पृथ्वी पृथुः कालोपकुंचिका ८ आर्द्र

अ कंशृंगवीरंस्यात् १ अथच्छत्रावितन्नकंकुस्तुंबुरुचधान्याकं ४ अथशुंठीमहौषधं स्त्रीनपुंस
को कयोर्विश्वंनागरंविश्वभेषजं आरणालकसौवीरकुल्माषाभिषुतानिच अवंतिसोमधान्या
५८ म्लकुंजलानिचकांजिकं ८ कांजिकंच सहस्रवेधिजतुकंबाह्लीकेहिंगुरामठम् ५ अथ
48 ह्वंगंधस्य तत्पत्रीकारवीपृथ्वीवाष्पिकाकवरीपृथुः ५ निशाख्याकांचनीपीताहरिद्राव
रवर्णिनी ५ रजनीच सामुद्रंयत्तुलवणमक्षीवंवशिरंचतत् १ सैंधवोस्त्रीशीतशिवंमाणि
मन्थंचसिंधुजम् शिलातकंच रौमकेवसुके १ पाक्यंविडंचकृतकेद्वयं १ सौवर्चलेक्षरु।
चके १ तिलकंतत्रमेचके १ मत्स्यण्डीफाणितंखंडविकारे १ शर्करासिता १ कूर्चिकाक्षीर।
विकृतिः १ स्याद्रसालातुमार्जिता १ स्यात्तेमनंतुनिष्ठानं १ अंजनेच त्रिलिंगावासितावधेः
शूलाकृतंभटित्रंचशूल्यं १ भक्तउकंभरहूंच उख्यंतुपैठरम् १ प्रणीतमुपसंपन्नं १ प्रयस्तं ५८
स्यात्सुसंस्कृतम् १ संस्कृतेसर्पिषादआसापिंकेदापिकेक्रमात् स्यात्पिच्छिलंतुविजिलं १

संसृष्टं शोधितं समे १ चिक्कणं मसृणं स्निग्धं २ समे भावितं वासिते १ आपक्वं पौलिरभ्यू
षः २ लाजाः पुंभूम्नि चाक्षताः १ पृथुकः स्याच्चिपिटकः १ धाना भृष्टयवे स्त्रियः । पूपोऽपू
पः पिष्टकः स्यात् २ करंभो दधिसक्तवः । भिस्सा स्त्री भक्तमंधोन्नमोदनोस्त्री स दीदिविः २
घारणात्तस्य भिस्सटा दग्धिका १ सर्वरसाग्रे मंडमस्त्रियाम् मासराचामनिस्रावा मंडे
भक्तसमुद्भवे २ यवागूरुष्णिका श्राणा विलेपी तरला च सा ४ गव्यं त्रिषु गवां सर्वं । गोवि
ड्गोमयमस्त्रियाम् १ तत्तु शुष्कं करीषोस्त्री १ दुग्धं क्षीरं पयः समम् २ पयस्यमाज्य
दध्यादि । द्रप्सं दधि घनेतरत् । घृतमाज्यं हविः सर्पिः ४ हविष्यं च नवनीतं नवो
द्धृतम् तत्तु हैयंगवीनं यद्ध्योगोदोहोद्भवं घृतम् । दंडाहतं कालशेयमरिष्टमपि गोरसः
४ तक्रं ह्युदश्वित्मथितं पादांब्वर्धांबु निर्जलं २ मंडं हतं कालसेयमरिष्टमपि गोरसः
४ तक्रे मंडं दधिभवं मस्तु । पीयूषोभिनवं पयः । अशनाया बुभुक्षा क्षुत् २ रोचको

श्रे ह्यौरुविश्च ग्रासस्तुकवलार्थकः २ सपीतिः स्त्रीतुल्यपाने। सग्धिः स्त्रीसहभोजने २ उद
को न्यातुपिपासातृट्तर्षः ४ जग्धिस्तु भोजनम् जेमनंलेहआहारोनिघासोन्याद इ
५५ त्यपि ५ सन्यवसानमभ्यवहारश्च सौहित्यंतर्पणंतृप्तिः ३ फलंभुक्तसमुज्झितम् २ का
५९ मंप्रकामंपर्याप्तंनिकामेष्टंयथेप्सितम् ८ गोपेगोपालगोसंख्यागोधुगाभीरवल्लवाः
गोमहिष्यादिकंपादबंधने। द्वौगव्येशे गोमान्गोमी ३ गोधनंतुगोकुलंस्याद्गवांव्र
जः २ धनेच त्रिष्वाशितंगवीनंतद्गावोयत्राशिताःपुरा। उक्षाभद्रोबलीवर्दऋषभोवृष
भोवृषः अनड्वान्सौरभेयोगौः २ ऋक्षकवणाक्करीवाडवेयः स्त्रणकरस्त्र उक्ष्णांसंहतिरौक्ष
कं। गव्यागोत्रागवां २ वत्सधेन्वोर्वात्सकधैनुकम् २ वृषोमहान्महोक्षःस्यात्। वृद्धोक्ष
स्तुजरद्गवः २ उत्पन्नउक्षाजातोक्षः १ सद्योजातस्तुतर्णकः। शकृत्करिस्तुवत्सःस्या ५५
त्। दम्यवत्सतरौसमौ २ आर्षभ्यःषण्डतायोग्यः। षण्डोगोपतिरिट्चरः ३ स्कंधदेशस्त्व

स्यवहः । सास्नातुगलकम्बलः २ स्यान्नस्तितस्तुनस्योतः २ प्रष्ठवाड्युगपार्श्वगः २ युगादीनां

तुवोढारोयुग्यप्रासंग्यशाकटाः २ खनतितेनतद्वोढास्येदंहालिकसैरिकौ २ धुर्वहेधुर्य

धौरेयधुरीणाः सधुरंधराः ५ उभावेकधुरीणैकधुरावेकधुरावहे २ सतुसर्वधुरीणोयोभरः

सर्वधुरावहः २ माहेयीसौरभेयीगौरुस्रामाताचशृंगिणी अर्जुन्यघ्न्यारोहिणीयोभरः सर्वे

धुरावहः २ माहेयीसौरभेयीगौरुस्रामाताचशृंगिणी अर्जुन्यघ्न्यारोहिणीस्यात् । अनडु

हीगोमतल्लिकासुरभिस्य उत्तमागोषुनैचिकी । वर्णादिभेदात्संज्ञाः स्युः शबलीधवलाद

यः द्विहायनीद्विवर्षागौः २ एकाब्दात्वेकहायनी २ चतुरब्दाचतुर्हायणी २ एवंत्र्यब्दात्रिहा

यणी २ वशावन्ध्या २ अवतोकातुस्रवद्गर्भा २ संधिनीत्वाक्रान्तावृषभेण । अथवेहद्ग

र्भोपघातिनी २ काल्योपसर्याप्रजने २ प्रष्ठौहीबालगर्भिणी । स्यादचंडीतुसुकरा २ बहुसू

तिः परेष्टुका २ चिरसूतावष्कयिनी २ धेनुः स्यान्नवसूतिका । सुव्रतासुखसंदोह्या २ पीनोः

ग्रं
को
५०

भीपीवरस्तनी २ द्रोणक्षीराद्रोणदुग्धा २ धेनुष्याबंधकेस्थिता । समांसमीनासायैवप्र
तिवर्षंप्रसूयते । ऊधस्तुक्लीबमापीनं २ समौशिवककीलकौ २ नपुंसिदामसंदानं २
पशुरज्जुस्तुदामनी २ वैशाखमंथमंथानमंथानोमंथदंडके ५ नक्काटोदमनकः खजि
कः त्वधस्य कुठरोदंडविष्कंभे २ मंजरस्य मंथनीगर्गरीसमे २ उष्ट्रेक्रमेलकमयमहांगाः
दासेरकोदीर्घग्रीवोद्भीवीणवस्त्वनुकरभः शिशुः । वानणस्य करभाःस्युःशृंख
लकादारवैःपादबंधनैः । अजाछागी २ शुभच्छागबस्तच्छगलकाअजः ५ वृगास्य मे ।
मेढ्रोरभ्रोरणोर्णायुमेषवृष्णयएडकः । उष्ट्रः अविस्थ उष्ट्रोरभ्राजवृंदेस्यादौष्ट्रकौरभ्रकाज
कं चक्रीवंतस्तुवालेयारासभागर्दभाःखराः ५ वैदेहकःसार्थवाहो २ नैगमोवाणिजो
वणिक २ पण्याजीवोह्यापणिकः क्रयविक्रयिकश्चसः विक्रेतास्याद्विक्रयिकः २ ५०
क्रायकःक्रयिकःसमौ २ वाणिज्यंतुवणिज्यास्यात् २ मूल्यंवस्नोऽप्यवक्रयः २ नीवीप

विपणोवलधने २ लाभोधिकंफलं १ परिदानंपरीवर्त्तोनैमेयनिमयावपि ४ पुमानुप
निधिर्न्यासः २ निक्षेपश्च प्रतिदानंतदर्पणं २ क्रयेप्रसारितंक्रय्यं । क्रेयंक्रेतव्यमात्रके
। विक्रेयंपणितव्यंचपण्यं ३ क्रय्यादयस्त्रिषु क्लीबेसत्यापनंसत्यंकारः सत्याकृतिः स्त्रि
याम् ३ विपणोविक्रयः २ संख्याःसंख्येयेह्यादशत्रिषु विंशत्याद्याः सदैकत्वेसर्वाः सं
ख्येयसंख्ययोः संख्यार्थेद्विबहुत्वेस्तः तासुचानवतेःस्त्रियः पंक्तेः शतसहस्रादिक्रमा
द्दशगुणोत्तरं यौतवंद्रुवयंपाय्यमितिमानार्थकंत्रयं ३ मानंतुलाङ्गुलिप्रस्थैः गुञ्जाः
पंचाद्यमाषकाः । तेषोडशाक्षःकर्षोस्त्री २ पलंकर्षचतुष्टयम् । सुवर्णविस्तौहेम्नो
क्षे २ कुरुविस्तस्तत्पलं । तुलास्त्रियांपलशतं । भारःस्याद्विंशतिस्तुलाः । आचि
तोदशभाराःस्युः । शाकटोभारआचितः । कार्षापणःकार्षिकःस्यात् २ कार्षिकेता

अ
को
५।
51

स्त्रिकेपणः। अस्त्रियामाढकद्रोणौ खारीवाहो निकुंचकः कुडवः प्रस्थइत्याद्याः प।
रिमाणार्थकाः पृथक् पादस्तुरीयो भागः स्यात्। अंशभागौ तु वंटकः २ द्रव्यं वित्तं स्वाप
तेयं रिक्थमृक्थं धनं वसु हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ।३ स्यात्कोशश्च हिरण्यं
च हेमरूप्ये कृताकृते १ ताभ्यां यदन्यत्तत्कुप्यं । रूप्यं तद्द्वयमाहतं । गारुत्मतं मरकत।
मश्मगर्भो हरिन्मणिः ४ शोणरत्नं लोहितकः पद्मरागः २ अथ मौक्तिकं मुक्ता १ तारश्च
अथ विद्रुमः पुंसि प्रवालः पुंनपुंसके १ सूर्यकान्तस्त्वग्निमणिः १ वैडूर्यं बालवायजम् १ र
त्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च १ स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् त।
पनीयं शातकौम्भं गांगेयं भर्म कर्बुरं चामीकरं जातरूपं महारजतकांचने रुक्मं कार्तस्व ५१
रं जाम्बूनदमष्टापदोऽस्त्रियां ८ कल्याणमञ्जनं कलधौतं कैरिकं भूमिपं द्रवहव अलंका

रक्तवर्णं यद्भृंगी कनकमित्यदः । दुर्वर्णं रजतं तत्स्याद्वर्ण्यं रंगं श्वेतमित्यपि ५ अपि शुल्बं ताम्रं रक
त्वधौतं वरीतिः स्त्रियामारकूटो न स्त्रियां १ पित्तलं आरः कपिलो हेम च अयस्तामकं अनुलेम्ले
ब्वम्लं वैराष्ट्रं वरिष्ठोऽश्मसारणि च ८ औडुम्बरं च लोहो ही शस्त्रकं तीक्ष्णं पिंडं कालायसाय।
सी अश्मसारं ७ पारवं च नं च अयमंडूरं सिंहानमपि तन्मले १ सर्वं चैतेजसं लोहं । विकार
स्त्वयसः कुशी । त्वारः कावः १ अथ चपलो रसः सूतश्च पारदे ४ गवलमाहिषं शृंगं १ अ
भ्रपोतो जननयाः सनम ४ तस्यां जननेशिखिविग्रीवं मयूरकवितन्नकं कर्परी ५ दार्विकाक्वाथो
द्भवं तस्य रसांजनं रसगर्भं तार्क्ष्यशैलं ४ रसजातं रसाग्रं च गंधाश्म नित्यगंधिकः सौगं
धिकश्च ३ वत्सधाकुलाल्योतकुलस्यिका ३ रीतिपुष्पं पुष्पकं तपोधाकं कुलस्तमांजनं
४ पिंजरं पीतनं तालमालं च हरितालकं ५ गोदंतं तनटं मेडनेवगैरेयमर्ध्यं गिरिजमश्म।
के तु शिलाजतु ५ बोलगंधरसप्राणपिंडगोपरसास्समाः ८ डिंडीरोऽब्धिकफः फेनः ३

अ
को
५२
52

न्दूरं नागसंभवम् २ चीनपिष्टं गांधारपंकस्वरक्तरेणुः सीसेनोत्न सवमंडनेच नागः सीस
कयोगेष्टवप्राणि ४ त्रपुपिच्चटं रंगवंगे ४ आलीनमपि अथपिचुस्तूलः २ अथकमल्लो
त्तरं स्यात्कुसुंभंवह्निशिखंमहारजनमित्यपि ४ मेषकम्बलऊर्णायुः २ शशोर्णं शशरण।
लोमनि २ मधूच्छीष्टंमात्विकादि २ सारवंच मधूच्छिष्टंतुसिक्थकं २ मनःशिलामनोगु
प्तामनोह्वानागजिह्विका ४ शिलाच नैपालीकुनटीगोला २ यवक्षारोयवाग्रजः पा
क्यः २ अथसर्जिकाक्षारःकापोतःसुखवर्चकः २ सौवर्चलंस्याद्रुचकं २ त्वक्क्षीरीवंश
रोचना २ वाशीच शिग्रुजश्वेतमरिचं २ मोरटंमूलमैक्षवम् । ग्रंथिकंपिप्पलीमूलं चटि।
काशिरइत्यपि ४ गोलोमीभूतकेशोना २ पत्रांगंरक्तचंदनम् २ त्रिकटुत्र्यूषणंव्योषं त्रि
फलातुफलत्रिकम् इत्यमरकोशेद्वितीयकांडेवैश्यवर्गः नवमः ९ ॥ शूद्राश्चावर ५२
वर्णाश्चवृषलाश्चजघन्यजाः आचंडालात्तुसंकीर्णाअम्बष्ठकरणादयः । शूद्राविशोस्तु

करणः। अम्बष्ठो वैश्याद्द्विजन्मनोः। शूद्रात्क्षत्रिययोरुग्रः। मागधः क्षत्रियाविशोः। माहि
ष्योऽर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः। ब्राह्मण्यां क्षत्रियात्सूतः। तस्यां वैदेहको विशः।
रथकारस्तु माहिष्यात् करण्यां यस्य संभवः। स्याच्चंडालस्तु जनितो ब्राह्मण्यां वृषलेन यः
। कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः। कुलकः स्यात्कुलश्रेष्ठी २ मालका
रस्तु मालिकः २ कुंभकारः कुलालः स्यात् २ पलगंडस्तु लेपकः तंत्रवायः कुविंदः स्यात्
२ तुन्नवायस्तु सौचिकः २ रंगाजीवश्चित्रकरः २ शस्त्रमार्जोऽसिधावकः २ पादूकृच्चर्मका
रः स्यात् २ व्योकारो लोहकारकः २ कर्मारश्च नाडिंधमः स्वर्णकारः कलादो रुक्मकार
के ४ हेमन्तुहिकश्च स्याच्छांखिकः काम्बविकः २ शौल्विकस्ताम्रकुट्टकः २ मणिकारो
वैकटिकः २ तक्षा तु वार्धकिस्त्वष्टा रथकारश्च काष्ठतट् ५ स्थपतिश्च ग्रामाधीनो।
ग्रामतक्षः २ कौटतक्षोऽनधीनकः २ क्षुरी मुंडी दिवाकीर्तिनापितांतावसायिनः ५

अ
को
५३
53

मंडिलश्च निर्णेजकः स्याद्रजकः २ ध्वाविकश्च शौंडिको मंडहारकः २ ह्यजाजीवीक
लपालश्च जाबालः स्यादजाजीवी २ देवाजीवस्तु देवलः २ स्यान्माया शांबरी २ इंद्र
जालं जालंकमृतिः कुहकंच मायाकारस्तु प्रातिहारकः २ शैलालिनस्तु शैलूषा
जायाजीवाः कृशाश्विनः भरता इत्यपि नटाः ६ चारणास्तु कुशीलवाः २ मार्दंगिका
२ जीवांतकः शाकुनिकाः २ द्वैवागुरिकजालिकौ २ वैतंसिकः कौटिकश्च मांसिक
श्च समं त्रयम् ३ भृतको भृतिभुक् कर्मकरो वैतनिकोऽपि सः ५ वार्तावहो वैवधिकः ।
भारवाहस्तु भारिकः २ विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः निहीनोऽपसदो जा
ल्मः क्षुल्लकश्चेतरश्च सः । भृत्ये दासेरदासेयदासगोप्यकचेटकाः नियोज्यकिंकर
प्रैष्यभुजिष्यपरिचारकाः ॥ पराचितपरिस्कंदपरजातपरैधिताः ४ मंदस्तुंदपरिमृ ५३
जआलस्यः शीतकोऽलसोऽनुष्णः ६ दक्षेतु चतुरपेशलपटवः सूत्थानउष्णश्च ६ उल

कश्च चंडालप्लवमातंगदिवाकीर्तिजनंगमाः निषादश्वपचावंतेवासिचंडालपुक्क

सः १० पुक्कसः श्वेतावसायी च भेदाः किरातशबरपुलिंदाम्लेच्छजातयः व्याधो

मृगवधाजीवो मृगयुर्लुब्धकोपि सः ४ कौलेयकः सारमेयः कुक्कुरो मृगदंशकः

शुनको भषकः श्वा स्यात् ७ मंडलो ग्रामसिंहो लोजिह्वापोरात्रिजागरः श्यामश्वोर

निकोल्लश्च ग्रलर्कस्तु स योगतः श्वा विश्वकद्रुर्मृगयाकुशलः १ सरमा शुनी २ वि

ट्चरः सूकरो ग्राम्यः २ वर्करस्तरुणः पशुः १ आच्छोदनं मृगव्यं स्यादाखेटो मृगया

स्त्रियाम् ४ पापर्द्धिश्च दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरंगकः २ चौरैकागारिक

स्तेनदस्युतस्करमोषकाः प्रतिरोधिपरास्कंदिपाटच्चरमलिम्लुचाः पारिपंथिकः

पश्यतोहरश्च चौरिकास्तैन्यचौर्ये च स्तेयं १ लोप्त्रं तु तद्धने १ वीतंसस्तूपकरणं

बंधने मृगपक्षिणाम् १ उन्माथः कूटयंत्रं स्यात् १ वागुरा मृगबंधनी १ [illegible]

ग्रं शुल्वं वराकरः स्त्रीनरज्जी त्रिषु वटी गुणः ५ उद्घाटनं घटीयंत्रं सलिलोद्वाहनं प्रहेः २
को पुंसि वेमा वायदंडः २ सूत्राणि नरि तंतवः २ वाणिर्व्यूतिः स्त्रियौ तुल्ये २ पुस्तं लेप्यादि
५४ कर्मणि । पंचालिका पुत्रिका वस्त्रदंतादिभिः कृता २ स्यात्सालभंजिका लंभेले
54 खेलाजलिकारिका । जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु २ पिटकः पेटकः २ पे।
टा मंजूषा २ अथ विहंगिका भारयष्टिः तदालम्बि शिक्यं काचः २ अथ पादुका पा।
दूरुपानत्स्त्री सैवानुपदीना पदायता ४ पादत्राणं वनद्ध्री वध्री वरत्रा स्यात् २ अश्वा।
देस्ताडनी कशा २ चांडालिका तु कंडोलवीणा चंडालवल्लकी नाराची स्यादेषणि
का २ शाणस्तु निकषः कषः २ व्रश्चनः पत्रपरशुः २ ईषिका तूलिका समे २ तैजसा
वर्तनी मूषा २ भस्त्रा चर्मप्रसेविका २ आस्फोटनी वेधनिका २ कृपाणी कर्तरी समे। ५४
वृक्षादनी वृक्षभेदी २ टंकः पाषाणदारकः २ क्रकचोऽस्त्री करपत्रं २ स्यादारा चर्मभे

टिकास्त्रीस्थूणालोहप्रतिमा २ शिल्पंकलादिकंकर्मप्रतिमानंप्रतिमानंप्र।
तिबिम्बंप्रतिमाप्रतियातना प्रतिच्छायाप्रतिकृतिरर्चापुंसिप्रतिनिधिरुपमोपमानं।
स्यात् ७ प्रतिरूपंप्रतिच्छंदःप्रतिकायश्च वाच्यलिंगाःसमस्तुल्यः सदृक्षःसदृशःस
दृक् साधारणःसमानश्च ८ स्युरुत्तरपदेत्वमीनिभसंकाशनीकाशप्रतीकाशोपमा
दयः ४ कर्मण्यातुविधाभृत्याभृतयोभर्मवेतनम् भरण्यंभरणंमूल्यंनिर्वेशःपणइत्य
पि ॥ सुराहलिप्रियाहालापरिस्रुद्वरुणात्मजा गंधोत्तमाप्रसन्नेराकादंबर्यःपरिस्रु
ता मदिराकश्यमद्येचापिवारुणीस्वादुरसामदिष्टाकल्यंद्वारहूरंकापिशायनंच
अवदंशस्तुभक्षणम् २ शुभवद्धार्यैचर्वणमुपदंशश्च शुंडापानंमदस्थानं। मधुवा।
रामधुक्रमाः २ गौडीपैष्टीचमाध्वीचफलोत्पावसुराणमरतेति मध्वासवोमाधवकः
२ मधुमाध्वीकमद्वयोः २ मैरेयमासवःसीधुः २ मेदकोजगलःसमौ २ संधानं।

ग्रे स्यादभिषवः २ किण्वंपुंसितुनग्नहूः २ कारोत्तमः सुरामंडः २ आपानंपानगोष्ठिका

को २ चषकोऽस्त्रीपानपात्रं २ सरकोप्यनुतर्षणम् २ धूर्तोक्षदेवीकितवोक्षधूर्तोद्यूतकृत्स

५५ माः ५ स्युर्लग्नकाः प्रतिभुवः २ सभिकाद्यूतकारकाः २ द्यूतोस्त्रियामक्षवतीकैतवंप

55

णइत्यपि ४ पणोक्षेषुग्लहः १ अक्षास्तुदेवनाः पाशकाश्चते २ परिणायस्तु

शारीणांसमंतान्नयने। अस्त्रियामष्टापदः शारिफलं २ खेलनाधाराः चतुरंगफलं अ

कर्षश्च प्राणिद्यूतंसमाह्वयः २ उक्ताभूरिप्रयोगत्वादेकस्मिन्येत्रयौगिकाः ताद्धर्म्या

दन्यतोवृत्तावूह्यालिंगांतरेपिते इत्यमरकोषेद्वितीयकांडेशूद्रवर्गः दशमः। २ इ

तिश्रीमदमरसिंहविरचितेमरकोषेनामलिंगानुशासनेभूम्यादिकांडोद्वितीयः। श्री

ॐ विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि लिंगादिसंग्रहैर्वर्गाः सामान्येवर्गसंश्र ५५

याः स्त्रीदाराद्यैर्यद्विशेष्यंयादृशैः प्रस्तुतंपदैः गुणद्रव्यक्रियाशब्दास्तथास्युस्तस्य

भेरकाः क्षेमंकरोरिष्टतातिः शिवतातिः शिवंकरः ४ सुकृतीपुण्यवान्धन्यः १ म
हेच्छस्तुमहाशयः १ उदीर्णउद्धतोदारोदात्तसुमहामनाः ५ हृदयालुः सुहृद
यः १ महोत्साहोमहोद्यमः १ प्रवीणेनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः वैज्ञा
निकः कृतमुखः कृतीकुशलइत्यपि ८ कृतकर्माकृतकृत्यः कृतार्थश्च प्रती
क्ष्योर्च्यः सांशयिकः संशयापन्नमानसः १ दक्षिणीयोदक्षिणार्हस्तत्रदक्षिणइ।
त्यपि १ स्युर्वदान्यस्थूललक्षदानशौण्डाबहुप्रदे ४ दाताच जैवातृकः स्यादायुष्मा
न् १ अन्तर्वाणिस्तुशास्त्रवित् १ परीक्षकः कारणिकः १ शान्तपाटलिकस्तु वरद
स्तुसमर्द्धकः १ हर्षमाणोविकुर्वाणः प्रमनाहृष्टमानसः ४ दुर्मनाविमनाअन्तर्म
नाः स्यात् उत्कउन्मनः १ हर्षमाणोविकुर्वी सोत्कंठस्तु दक्षिणेसरलोदारौ १ सु
कलोदातृभोक्तरितत्परेप्रसितासक्तौ १ इष्टार्थोद्युक्तउत्सुकः १ प्रतीतेप्रथित

अ ज्ञानविन्नविद्वानविज्ञता: ८ गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ २ इभ्य आ
को ढ्यो धनी २ स्वामी त्वीश्वरः पतिरीशिता अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः
५८ १० अधिकर्द्धिः समृद्धः स्यात् २ कुटुंबव्यापृतस्तु यः स्यादभ्यागारिकस्तस्मिन्नुपा
56 धिश्च पुमानयम् २ वरांगरूपोपेतो यः सिंहसंहननो हि सः १ निर्वार्यः कार्यकर्ता
यः संपन्नः सत्वसंपदा १ प्रवाविसृकः १ अथ मनोजवसः पितृसन्निभः २ सत्कृत्या
लंकृतां कन्यां यो ददाति स कुकुदः १ लक्ष्मीवांल्लक्ष्मणः श्रील श्रीमान् ४ स्नि
ग्धस्तु वत्सलः २ स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ४ स्वतंत्रोऽपावृ
तः स्वैरी स्वच्छंदो निरवग्रहः ५ निर्यंत्रणो निरंकुशो यथाकामीव परतंत्रः परा
धीनः परवान्नाथवानपि ४ अधीनो निघ्न आयत्तोऽस्वच्छंदो गृह्यकोऽप्यसौ खलपूः स्याद्ब ५८
हुकरः १ दीर्घसूत्रश्चिरक्रियः २ जाल्मोऽसमीक्ष्यकारी स्यात् २ कुंठो मंदः क्रिया

क्षयः । कर्मक्षमोऽलंकर्मीणः क्रियावान्कर्मसूद्यतः । स कार्मः कर्मशीलो यः २ क
र्मशूरस्तु कर्मठः २ कर्मण्यो भृत्कर्मकरः २ कर्मकारस्तु तत्क्रियः २ अपस्नातो
मृतस्नातः २ आमिषाशी तु शाष्कुलः २ बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ४ प
रान्नः परपिंडादः २ भक्षको घस्मरोऽद्मरः आद्यूनः स्यादौदरिके विजिगीषाविवर्जिते ।
उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके २ सर्वान्नीनस्तु सर्वान्नभोजी २ गृध्नुस्तु गर्ध
नः लुब्धोऽभिलाषुकस्तृष्णक् ५ तृषितः स्यात्पिपासितः तिषितो लालसो लोलः
समौ लोलुपलोलुभौ २ लंपटश्च सोन्मादस्तून्मदिष्णुः स्यात् । अविनीतः समुद्धतः
२ निर्मर्यादश्च मत्ते शौण्डोत्कटक्षीबाः २ कामुकः कमितानुकः कम्रः कामयिता
भीकः कमनः कामनोऽभिकः ९ छेकोऽविदग्धः २ व्यसनी पंचभद्र उपप्लुते २ वेश्या
पतिर्भुजंगः स्याद्विटः पल्लविको विटः ५ भिक्षाचरस्तु भिक्षाकः स्याद्याचकः ।

ग्रं पश्चितौ विधेयोविनयग्राहीवचनेस्थितआश्रवः ४ वश्यःप्रणेयः २ निभृतवि।
को नीतप्रश्रिताःसमाः ३ धृष्टेधृष्णग्वियातश्च ४ प्रगल्भःप्रतिभान्विते २ तत्कालधीस्त
५० स्यादधृष्टेतुशालीनः विलक्षोविस्मयान्विते २ अधीरेकातरः २ त्रस्तोभीरुभीरु
57 कभीलुकाः ४ त्रस्तोभीतस्त्वचकितोदरितश्चससंभ्रमः आशंसुराशंसितरि २ गृह।
यालुर्ग्रहीतरि २ श्रद्धालुःश्रद्धयायुक्ते २ पतयालुस्तुपातुके २ लज्जाशीलोप
त्रपिष्णुः २ वंदारुरभिवादके शरारुर्घातुकोहिंस्रः ३ स्याद्वर्धिष्णुस्तुवर्धनः २ उ
त्पतिष्णुस्तूत्पतिता २ अलंकरिष्णुस्तुमंडनः २ भूष्णुर्भविष्णुर्भविता ३ वर्तिष्णुर्व
र्तनःसमौ २ निराकरिष्णुःक्षिप्नुःस्यात् २ सांद्रःस्निग्धस्तुमेदुरः ज्ञातातुविदुरोविं
दुरोविंदु ३ विकासीतुविकस्वरः २ विसृत्वरोविसृमरः प्रसारीचविसारिणि ४ स ५०
हिष्णुः सहनःक्षंतातितिक्षुःक्षमिताक्षमी ६ क्रोधनोमर्षणःकोपी ३ रोषणश्च

चंडस्त्वत्यंतकोपनः २ जागरूकोजागरिता २ घूर्णितःप्रचलायितः २ स्वपक्श
यालुर्निद्रालुः ३ निद्राणशयितौसमौ २ पराङ्मुखःपराचीनः २ संमुखीन
स्त्वभिमुखः २ स्यादवाङप्यधोमुखः २ देवानंचतिदेवद्र्यङ् विष्वद्र्यङ्विष्वगंच
ति। यःसहांचतिसध्र्यङ्स। सतिर्यङ्यस्तिरोंचति। वदोवदावदोवक्ता २ वा
गीशोवाक्पतिःसमौ २ वाचोयुक्तिपटुर्वाग्मी २ वावदूकोतिवक्तरि २ स्याज्जल्पा
कस्तुवाचालोवाचाटोवहुगर्ह्यवाक् ४ वहुभाषीजनप्रकश्च दुर्मुखेमुखराव
द्धमुखौ २ शक्तःप्रियंवदे २ लोहलःस्यादस्फुटवाक् गर्ह्यवादीतुकद्वदः समौ
कुवादकुचरौ २ स्यादसौम्यस्वरोस्वरः २ रवणःशब्दनः २ नांदीवादीनांदीक
रःसमौ २ जडोज्ञः २ एडमूकस्तुवक्तुंश्रोतुमशिक्षितः। तूष्णींशीलस्तुतू
ष्णीकः २ नग्नोवासादिगंबरः २ निष्कासितोवकृष्टःस्यात् २ अपध्वस्तस्तुक

अ कृतः २ आत्तगर्वोऽभिभूतः स्यात् २ दापितः साधितः समौ २ निकृतः स्याद्विप्रकृतः
को २ विप्रलब्धस्तु वंचितः मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ४ अधिक्षिप्तः प्र
५८ तिक्षिप्तः २ बद्धे कीलितसंयुतौ २ आपन्न आपत्प्राप्तः स्यात् २ कांदिशीको भयद्रु
58 तः २ प्रत्यादिष्टो निरस्तः स्यात् २ प्रत्याख्यातो निराकृतः १ आक्षारितः क्षारितोऽभि
शस्तः २ संकसुकोऽस्थिरे २ व्यसनार्तोपरक्तौ द्वौ १ विहस्तव्याकुलौ समौ २ विक्ल
वो विह्वलः २ स्यात्तु विवशोऽरिष्टदुष्टधीः २ कश्यः कशार्हे २ सन्नद्ध आततायी व।
धोद्यते २ द्वेष्ये त्वक्षिगतः २ वध्यः शीर्षच्छेद्य इमौ समौ २ विष्यो विषेण यो वध्यः
मुसल्यो मुसलेन यः १ शिश्विदानोऽकृष्णकर्मा २ चपलश्चिकुरः समौ २ चलेच।
लः स्यात्तरलः चंचलश्चापलश्चलः दोषैकदृगादिसदृशः पुरोभागी निगद्यते।
दोषैकदृक्पुरोभागी निपाठः निकृतस्त्वनृजुः शठः २ कर्णेजपः सूचकः स्यात् २ ५८

पिशुनो दुर्जनः खलः नृशंसो घातुकः क्रूरः पापः ४ धूर्तस्तु वंचकः २ अज्ञे मूढय
थाजातमूर्खवैधेयबालिशाः कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ५ कीना।
शश्च निःस्वस्तु दुर्गतो दीनो दरिद्रो दुर्विधोपि सः ५ हःस्युः कीकटश्च वनीपको या।
वनको मार्गणो याचकार्थिनौ ५ नर्कुकश्च अहंकारीत्वहंयुः स्यात् २ शुभंयुस्तु
शुभान्वितः २ दिव्योपपादुका देवाः २ नृगवाद्या जरायुजाः । स्वेदजाः क्रिमिदंशा
द्याः २ पक्षिसर्पादयोऽण्डजाः १ उद्भिदस्तरुगुल्माद्याः उद्भिदुद्भिज्जमुद्भिदं ३ सुंदरं रु।
चिरं चारु सुषमं साधु शोभनम् कांतं मनोरमं रुच्यं मनोज्ञं मंजु मंजुलम् ११ दारिव
वल्लभमनोहारिव तदासेचनकं तृप्तेर्नास्त्यंतो यस्य दर्शनात् । अभीष्टेऽभीप्सितं हृ
द्यं दयितं वल्लभं प्रियम् ८ निकृष्टप्रतिकृष्टार्वरेफयाप्याधमावमाः कुपूयकु
त्सितावद्यखेटगर्ह्याणकाः समाः १३ अवरश्च मलीमसं तु मलिनं कच्चरं मलदू

अ
को
५९
59

षितम् ४ म्लानं कल्माषं च पूतं पवित्रं मेध्यं च २ वीध्रं च विमलार्थकम् निर्णि
क्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ५ असारं फल्गु । शून्यं तु वशिकं रिक्तत
च्छके ४ क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः मुख्यवर्यवरेण्याश्च प्रवर्होऽन।
वरार्ध्यवत् परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ८ पालीवरश्च श्रेयान् श्रेष्ठः
पुष्कलः स्यात् परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्या सत्तमश्चातिशोभने ५ स्युरुत्तरपदे
व्याघ्रपुंगवर्षभकुंजराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ७ अप्राग्र्यं
द्वयहीने द्वे अप्रधानोपसर्जने १ विशंकटं पृथु बृहद् विशालं पृथुलं महत् व
ड्रोरुविपुलं ४ विकटं च पीनपीव्नी तु स्थूलपीवरे ४ वनो बहुलश्च स्तोकाल्प
क्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं ८ कृशं तनु २ स्त्रियां मात्रा त्रुटिः पुंसि लवलेशक ५९
णाणवः ८ अत्यल्पेऽल्पिष्ठमल्पीयः कणीयोऽणीय इत्यपि ५ प्रभूतं प्रचुरं प्राज्य

मदभ्रंबहुलंबहुपुरुहूपुरुभूयिष्ठंस्फिरंभूयश्चभूरिच ॥१ परःशताद्यास्तेयेषांपरा।
संख्याशतादिकात् गणनीयेनगणेयं २ संख्यातेगणितं। अथसमंसर्वंविश्वमशे
षंकृत्स्नंसमस्तनिखिलाखिलानिनिःशेषम् समग्रसकलाखंडपूर्णंस्यादनूनके ।४ घ
